International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(5): 166-172
© 2023 IJSR
www.anantaajournal.com
Received: 07-08-2023
Accepted: 09-09-2023

**सुमननस्करः**
शोधच्छात्रः,
नवनालन्दामहाविहारः
(सम-विश्वविद्यालयः),
भारतसर्वकारस्य
संस्कृतिमंत्रालयाधीनः,
नालन्दा, बिहार, भारत

Corresponding Author:
**सुमननस्करः**
शोधच्छात्रः,
नवनालन्दामहाविहारः
(सम-विश्वविद्यालयः),
भारतसर्वकारस्य
संस्कृतिमंत्रालयाधीनः,
नालन्दा, बिहार, भारत

# शिवसङ्कल्पसूक्ते मनसः परीक्षा

सुमननस्करः

**सारांश**

शुक्लयजुर्वेदस्य वाजसनेयिसंहितायां चत्वारिंशत् अध्यायाः विद्यन्ते। तन्मध्ये चतुस्त्रिंशदध्याये शिवसङ्कल्पसूक्तमस्ति। अस्मिन् सूक्तस्य षट् मन्त्रेषु एव अगस्त्यः ऋषिणा मनसः विषये आलोचनां कृतवान्। शिवसङ्कल्पसूक्तमिति पदस्य अभ्यन्तरे 'शिव', 'सङ्कल्प', 'सूक्तम्' चेति शब्दत्रयमस्ति। 'शिव' इति पदस्यार्थं भवति शुभं, महत् मङ्गलमयश्चेति। 'सङ्कल्प' इति पदस्यार्थं भवति 'स्थिरीकृतकर्म' इति। 'सूक्तम्' इति पदस्यार्थः सुन्दर उक्तिः। अतः शिवसङ्कल्पसूक्तमिति पदस्यार्थः स्थिरीकृतानि कर्माणि शुभं भवतु एवं रूपं सुन्दरमुक्तानि।

अत्र प्रश्नमुद्घाटयति यत् कस्य स्थिरीकृतानि कर्माणि? उत्तरमस्ति मनसः। सूक्तेऽस्मिन् मनसः वैशिष्ट्यानि निरूपितानि। 'मनस्' इति शब्दः भवति सकारान्तः क्लिबलिङ्गश्च। वैदिकयुगादेव मनसः विषये गभीराध्ययनस्य धारा प्रवाहितास्ति। विशेषतः अगस्त्यः ऋषिणा शुक्लयजुर्वेदस्य शिवसङ्कल्पसूक्ते षट् मन्त्रेषु मनसः विस्तारितालोचना कृतः। तत्र ऋषिणा निर्देशितं यत् अपूर्वमिन्द्रियं भवति मनः। अपि च इन्द्रियमिदं ज्योतिरूपं गमनशीलश्च। उत्तमः सारथिः यथा प्रयोजनानुसारेण यथायथमश्वानां रश्मिसंयमनं कृत्वा रथं चालयति तथैव सारथिवत् मनस्तु मनुष्यानां चालकः।

गमनशीलता तु मनसः धर्मः। चक्षुरादीन्द्रियापेक्षया मनः द्रुतं गन्तुं शक्नोति। न केवलं सुप्तस्य पुरुषस्य, जाग्रतः पूरुषस्यापि पञ्चकर्मेन्द्रियाणि पञ्चज्ञानेन्द्रियाणि त्यक्त्वा मनः द्रुतं वहुदूरं गन्तुं शक्यते। मुहुर्तमेव पुनरागमनं कर्तुं शक्यते। मनसः अभीष्ट विषयेन सह संयोगहेतोः गमनागमनमिदम्। यागादिकार्येषु यानि विधिविधानानि कर्माणि सन्ति तानि विधिविधानानि कर्माणि मनीषिणः मनसा क्रियन्ते। उत्कृष्टः ज्ञानं विशेषः ज्ञानस्य वा जनको एव मनः। मनः धैर्यस्य आधार-स्वरूपम् अमृतस्वरूपञ्च। मनः ज्ञानस्य प्रकाशः। मनसा भूतकालं , वर्तमानकालं भवीष्यत्कालं सर्वं परिगृहीतमस्ति। हृदये भवति मनसः प्रतिष्ठा। एवं शक्तिमान पदार्थस्य सङ्कल्पं शुभं भवतु इति निर्दिशम् अगस्त्यः ऋषिणा शिवसङ्कल्पसूक्तस्य षट् मन्त्रस्य माध्यमेन यत् व्याख्यां कृतवान् तदस्मिन् प्रवन्धे प्रकाशं करणाय प्रयासं भविष्यति।

**कूटशब्द** : शिवसङ्कल्पसूक्तम्, मनस्, प्रज्ञानम्, अपूर्वम्, नियन्त्रणम्।

## प्रस्तावना

विद् धातोः चत्वारः अर्थाः विद्यन्ते। यथा - सत्त्वार्थे, लाभार्थे, ज्ञानार्थे, विचरणार्थे चेति। उक्तञ्च –

"सत्तायां विद्यते, ज्ञाने वेत्ति, विन्ते विचारणे।
विन्दते विन्दति प्राप्तौ, श्यन्लुक्श्नम्शोष्विदं क्रमात्" [1] इति।

ज्ञानार्थकः विद् धातोः घञ् प्रत्यय योगेन 'वेद' इति शब्दस्य उत्पत्तिः भवति, यस्य अर्थः भवति ज्ञानं परं ज्ञानं वा। आचार्यः सायणेन वेद शब्दस्य व्याख्या प्रसङ्गे एव उक्तवान् –

"इष्टप्राप्त्यनिष्ट-परिहारयोरलौकिकम् उपायं यो ग्रन्थो वेदयति, सः वेदः"[2] इति। अर्थात् यः ग्रन्थः इष्ट-प्राप्तिः अनिष्टं निवारणाय च अलौकिकमुपायं कथयति सः वेदः।

आचार्य-याज्ञवल्क्येन वेद विषये उक्तवान्-

"प्रत्यक्षेणानुमानेन वा यस्तूपयो न विद्यते
एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता"[3] इति।

अर्थात् प्रत्यक्ष माध्यमेन अनुमान माध्यमेन वा यदुपायं न ज्ञातुमर्हति, तदुपायं तु वेदमध्ये अस्ति एतत्तु वेदस्य वैशिष्ट्यमस्ति।
वेदाः चत्वारः - ऋग्वेदः, यजुर्वेदः, सामवेदः अथर्ववेदश्चेति। यजुर्वेदः पुनः द्विविधः - शुक्लयजुर्वेदः कृष्णयजुर्वेदश्चेति। विषयानुसारेण सर्ववेदस्य चत्वाराः विभागाः विद्यन्ते। ते यथा - संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषदश्चेति।
शुक्लयजुर्वेदस्य वाजसनेयिसंहितायां चत्वारिंशत् अध्यायाः विद्यन्ते। तन्मध्ये चतुस्त्रिंशदध्याये शिवसङ्कल्पसूक्तमस्ति। अस्मिन् सूक्तस्य षट् मन्त्रेषु एव अगस्त्यः ऋषिणा मनसः विषये आलोचनां कृतवान्।
शास्त्रेषु उक्तम् - नाम्ना एव वस्तुसिद्धिः इति। अतः अस्माकं कर्तव्यं विद्यते यत् सूक्तस्य अभ्यन्तरे प्रवेशात् पूर्वमेव सूक्तस्य नाम विषये आलोचनां करणीयमेतेन सूक्तस्य विषये ज्ञानार्जनं भविष्यति। शिवसङ्कल्पसूक्तमिति पदस्य अभ्यन्तरे 'शिव', 'सङ्कल्प', 'सूक्तम्' इति शब्दत्रयमस्ति। 'शिव' इति शब्दं भवति विशेषणम्। एतस्य अर्थं भवति शुभं, महत् मङ्गलमयश्चेति। अक्सफोर्ड विश्वविद्यालयस्य संस्कृत विभागस्य अध्यापकः स्यार मनिय्यार मनिय्यार उइलियामस् महोदयेन कृतः संस्कृत-अ्यांलो अभिधानमनुसारेण शि = यः परिव्यप्तमस्ति, व = दशायाः कृपायाः वा प्रतिमूर्तिः स्वरूपम्। शिवपुराणेषु 'शिव' शब्दस्य अर्थः विषये एव उक्तं –

"शं नित्यं सुखामानन्दमिकारः पुरुषः स्मृतः।
वकारः शक्तिरमृतं मेलनं शिव उच्यते"[4]।। इति।

अत्र शिवः = श + इ + व। शकारस्य अर्थं भवति नित्यं सुखमानन्दश्च। इकारस्य अर्थं भवति पुरुषः। वकारस्य अर्थं भवति अमृतशक्तिः।
'सङ्कल्प' इति पदस्य अर्थं भवति 'स्थिरीकृतकर्म' इति।
'सूक्तम्' इति पदस्यार्थः सुन्दर उक्तिः। ततः क्लीवलिङ्गे सूक्तमिति पदं सिद्धं भवति। अतः शिवसङ्कल्पसूक्तमिति पदस्यार्थः स्थिरीकृतानि कर्माणि शुभं भवतु एवं रूपं सुन्दराणि उक्तानि।
अत्र प्रश्नमुद्धाटयति यत् कस्य स्थिरीकृतानि कर्माणि? उत्तरमस्ति मनसः। सूक्तेऽस्मिन् मनसः वैशिष्ट्यानि निरूपितानि। अपि च एवं शक्तिमान् पदार्थस्य सङ्कल्पं शुभं भवतु इति निर्दिश्यते अगस्त्यः ऋषिणा। निम्ने ऋषिणा प्रदत्तेन मनसः वैशिष्ट्यानि क्रमान्वयेन आलोचितानि भवन्ति –

**मनः गमणशीलः ज्योतिरूपश्च –** मनसः वैशिष्ट्यानि निरूपनप्रसङ्गे ऋषिणा उक्तं - गमनशीलता तु मनसः धर्मः। चक्षुरादीन्द्रियापेक्षया मनः द्रुतं गन्तुं शक्नोति। न केवलं सुप्तस्य पुरुषस्य, जाग्रतः पूरुषस्यापि पञ्चकर्मेन्द्रियाणि तथा वाक्, पाणि, पाद, पायु, उपस्थानि च पञ्च ज्ञानेन्द्रियाणि तथा चक्षुः, कर्णः, नासिका, जिह्वा त्वकञ्च त्यक्त्वा मनः द्रुतं वहुदूरं गन्तुं शक्यते। पुनः मुहुर्तमेव पुनरागमनं कर्तुं शक्यते। उक्तञ्च अगस्त्यः ऋषिणा –

"यज्जाग्रतो दूरमुदैति दैवं
तदु सुप्तस्य तथैवेति"[5] इति।

प्रसङ्गेऽस्मिन् श्रीमद्भगवद्गीतायामुक्तम् –

"इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः"[6] इति।

[1] वैयाकरणसिद्धान्तकौमुदी, चुरादिप्रकरणम्।
[2] तैत्तिरीय संहिता
[3] याज्ञवल्क्य संहिता।
[4] शिवपुराणम्।
[5] शिवसङ्कल्पसूक्तम्/१

अर्थात् चक्षुरादीनि इन्द्रियाणि स्थूलशरीरात् वलवत्तराणि इत्युच्यते। अपि तु इन्द्रियेभ्यः मनः श्रेष्ठतरमित्यूच्यते। जीवानां शरीरं तु प्रत्यक्षयोग्यम्। अतः प्रार्थिवशरीरं भवति स्थूलशरीरम्। एतत् स्थूलशरीरपेक्षया एकादशेन्द्रियाणां मध्ये मनः श्रेष्ठः तथा सूक्ष्मः। पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि च एतानि दशेन्द्रियाणि दृष्टिग्राह्यं भवति। अतः एतानि दशेन्द्रियाणि भवति स्थूलेन्द्रियाणि। परन्तु मनः न प्रत्यक्षयोग्यं भवति। अतः मनस्तु सूक्ष्मेन्द्रियम्। अस्मिन् सूक्ष्मेन्द्रियस्य गतिवेगं आलोकरश्मि अपेक्षया विद्युतपेक्षया वा अति द्रुतम्।

**मनः अपूर्वम् –** द्वितीयः मन्त्रं निरूपण-प्रसङ्गे ऋषिणा उक्तं मनसा कर्मनिष्ठः मनीषिणः याग-यज्ञादिषु कार्येषु कर्माणि कुर्वन्ति। अर्थात् यागादिकार्येषु यानि विधिविधानानि कर्माणि सन्ति तानि विधिविधानानि कर्माणि मनीषिणः मनसा क्रियन्ते। वेदः श्रुतिः नाम्नाप्याख्यायते। पुराकाले केवलं श्रुत्वेव वेदरक्षणमभवत्। अनन्तरं लेखनस्य प्रक्रिया आगता। केवलं स्मरणं कृत्वा मनीषिणः सहस्राधिकं वत्सरं यावत् वेदमन्त्रस्प रक्षणं कृतः। तानि सर्वाणि मन्त्राणि मनसि एव स्मरणं कृत्वा यज्ञस्य समग्रकार्याणि सम्पादयन्ति। प्रसङ्गेऽस्मिन् अगस्त्यऋषिणा शिवसङ्कल्पसूक्तेषु उक्तम् –

"येन कर्माण्यपसो मनीषिणो
यज्ञे कृण्वन्ति विदथेषु धीराः"[7] इति।

मनः अपूर्वमिन्द्रियमिति ऋषिणा निर्देशितम्। न पूर्वमिति अपूर्वम् , सर्वप्रथमं सर्वप्रधानं वा। मनस्तु सृष्टभूतः प्रथममिन्द्रियम्। 'अपूर्वम्' इति शब्दस्य व्याख्यानविषये उवटभाष्ये उक्तं - "न विद्यते पूर्वमिन्द्रियं यस्मत्तदपूर्वं यद्वा अपूर्वमनपरं यच्च अन्तर्मध्ये प्रजानामास्ते" [8] इति। विषयऽस्मिन् महीधरभाष्ये एव उक्तं - "इन्द्रियेभ्यः पूर्वं मनसः सृष्टेः यद्वा अपूर्वमनपरं वाह्यमित्युक्तेरपूर्वमात्मपरम्"[9] इति। एतत् सुस्पष्टं यत् मनः एव निर्मितभूतं प्रथममिन्द्रियं यस्य अवस्थानं भवति प्राणिनां अन्तः –

"यदपूर्वं यक्षमन्तः प्रजानां"[10]।

मनस्तु पूज्यः। ऋषिणा मन्त्रस्य अभ्यन्तरे 'यक्षम्' इति पदेन तत् निर्देशितम्। प्रजानां अन्तर्भागेषु स्थितः सर्वप्रथमं निर्मितमिन्द्रियं पूज्यः मनः, यस्य द्वारा धीराः मनीषिणः यज्ञस्य विधिविधानेषु कर्माणि क्रियन्ते तन्मसः सङ्कल्पं शुभं भवतु इति।

**मनः प्रज्ञानमृतं ज्योतिः रूपश्च –** मनः प्रज्ञानम्। उत्कृष्टः ज्ञानं विशेषः ज्ञानस्य वा जनको एव मनः। विषयेऽस्मिन् महीधरभाष्ये उक्तं - "यत् मनः प्रज्ञानं विशेषेण ज्ञानजनकम् प्रकर्षेण ज्ञायते येन तत् प्रज्ञानं - करणाधिकरणयोश्चेति - इति करणे ल्युटः प्रत्ययः" [11] इति। अस्मिन् प्रसङ्गे उवटभाष्ये निर्देशितम् - "यत् प्रज्ञानं यन्मनः प्रज्ञानं विशेषप्रतिपत्तिप्रज्ञानम्" [12] इति। मनः केवलं न उत्कृष्टः ज्ञानस्य जनकः, उत्कृष्टः - अपकृष्टः तथा विशेषः - सामान्यं एवं द्विविधः ज्ञानस्य जनकः भवति मनः। अर्थात् घटः प्रत्यक्षकाले चक्षुरिन्द्रियेण सह घटस्य यदा संयोगं भवति तदा 'तत्तु घटः एव' एवं ज्ञानं यदा भवति, तत् ज्ञानं तु मनसः जायते कारणमगस्त्यः ऋषिणा "मनः प्रज्ञानम्"[13] इति मन्त्रस्य माध्यमेन निर्देशितम्।

मनः धृतिः। मनः धैर्यस्य आधार-स्वरूपम्। विषयेऽस्मिन् महीधरभाष्ये उक्तम् - "यच्च मनो धृतिधैर्यरूपं मनसैव धैर्योत्पत्तेर्मनसि धैर्यमुपचर्यते कार्यकारणयोरभेदात्"[14] इति।

अमृतस्वरूपं भवति मनः। न मृतः = अमृतः। ऋषिणा मन्त्रस्य अभ्यन्तरे "अमृतम्"[15] इति पदेन तत् निर्देशितम्। विषयेऽस्मिन् महीधरभाष्ये उक्तम् -"यच्चामृतममरणधर्मि आत्मारूपत्वात्" [16] इति। अर्थात् शरीरस्य यदा विनाशं भवति तदा मनसः विनाशं न भवति।

ज्योतिस्वरूपं मनः। मनः प्रकाशस्वरूपम्। ज्योतिः = प्रकाशः। मनः प्रकाशः। मनः ज्ञानस्य प्रकाशः। प्रसङ्गेऽस्मिन् यास्काचार्येण निर्देशितं यत् - "यच्च मनः प्रजासु जनेषु अन्तर्वर्तमानं सत् ज्योतिः प्रकाशकं सर्वेन्द्रियाणाम् उत्तमपि पुनरुच्यते आदरार्थम् अभ्यासे भूयांसमर्थं मन्यन्त"[17] इति।

मनसः विना किमपि कार्यं न भवति। अस्मिन् विषये अगस्त्यः ऋषिणा निर्देशितं यत् –

---

[6] श्रीमद्भागवद्गीता ३/४२
[7] शिवसङ्कल्पसूक्तम्/२
[8] उवटभाष्यम्
[9] महीधरभाष्यम्
[10] शिवसङ्कल्पसूक्तम्/२
[11] महीधरभाष्यम्
[12] उवटभाष्यम्
[13] शिवसङ्कल्पसूक्तम्
[14] महीधरभाष्यम्
[15] शिवसङ्कल्पसूक्तम्
[16] महीधरभाष्यम्
[17] यास्काचार्य

"यस्मान्न ऋते किं चन कर्म क्रियते"[18] इति।

यदा मानवः किमपि कार्यं करोति तदा यदि मनः न तिष्ठति, तत् काले कार्यं सम्यक्तया न भविति। प्रसङ्गेऽस्मिन् महीधरभाष्ये उक्तम् यत् -" यस्मन्मनसः ऋते यन्मनोविना किञ्चन किमपि कर्म न क्रियते जनैः सर्वकर्मसु प्राणिनां मनः पूर्वं प्रवृत्तेर्मनः स्वास्थ्यं विना कर्माभावादित्यर्थः"[19] इति। मनः विशेषः ज्ञानस्य जनकः। मनः अमृतम्। मनः धैर्यस्य आधारः। मनः प्रकाशः। मनसः उपस्थितिं विना किमपि कर्मं न सम्पादयति। मनः प्रजासु अन्तःकरणे विद्यमानम्। अतः एवं मनः सुन्दरं सङ्कल्पयुक्तं भवतु इति ऋषिणा प्रार्थयते।

**मनसः विस्तारः –** मनसा भूतकालं, वर्तमानकालं भवीष्यत्कालं सर्वं परिगृहीतमस्ति। पूर्वजन्मस्य यत् संस्कारमस्ति तत् संस्कारं स्वीकृत्वा मानवः पुनः नवजन्मलाभं करोति। प्रकाशः तथा ज्योतिरूपं मनः तत् प्रकाशयति। अतः भूतकालस्य, वर्तमानकालस्य भवीष्यत्कालस्य च ज्ञानं मनसा एव परिगृहीतं भवति। प्रसङ्गेऽस्मिन् महीधरभाष्येषु उक्तम् - "येन मनसा इदं सर्वं परिगृहीतं परितः सर्वतो ज्ञानम्"[20]। विषयेऽस्मिन् अगस्त्यः ऋषिणा निर्देशितं यत् –

"येनेदं भूतं भुवनं भविष्य-
त्परिगृहीतममृतेन सर्वम्"[21] इति।

यज्ञस्थले अपि मनसः उपस्थितिः अपरिहार्यं, न तर्हि यज्ञकार्यं सुसम्पन्नं न भविष्यति। सप्तहोता मनसा एव यज्ञं सम्पादयन्ति। किं नाम सप्तहोता? ऋग्वेदस्य प्रधानः पुरोहितः होता, तिस्रः सहकारी पुरोहिताः - मैत्रावरुणः, अच्छावाक्, ग्रावस्तुतश्च, अपि च अथर्ववेदस्य सहकारी तिस्रः पुरोहिताः ब्रह्मणाच्छंसी, अग्नीध्रः पोता च एते सप्त होताः। अतः मनसः विना किमपि कार्यसम्पादनं न भवति।

**मनसः व्याप्तिः –** ऋग्वेदस्य सर्वे मन्त्राः, यजुर्वेदस्य सर्वे मन्त्राः, सामवेदस्य सर्वे मन्त्राः मनसः अन्तर्गतं प्रतिष्ठितमस्ति। रथनाभौ अराः इव तत् ज्ञानं मनसि विद्यमानम्। प्रकाशकाले प्रकाशस्वरूपः मनः तत् ज्ञानं प्रकाशितं करोति। प्रसङ्गेऽस्मिन् अगस्त्यः ऋषिणा निर्देशितम् –

"यस्मिनृचः सामयजूंषि यस्मि-
न्प्रतिष्ठिता रथनाभाविवाराः"[22] इति।

प्राणिनां सम्पूर्णं ज्ञानमेव मनसि विद्यमानम्। ज्ञानस्य अभावः दृश्यते मनसः वैकल्याद्। अतः जीवनर्वत्मनि परिचालिताः सर्वेप्राणिनः मनसा एव। अस्मिन् विषये महीधरभाष्येषु उल्लिखितं यत् - "प्रजानां सर्वं चित्तं ज्ञानं सर्वपदार्थविषयि ज्ञानं यस्मिन् मनसि ओतं प्रोतं निक्षिप्तं तन्तुसन्ततिः पटे इव सर्वं ज्ञानं मनसि निहितं - मनः स्वास्थ्ये एव ज्ञानोत्पत्तिर्मनो वैराग्ये ज्ञानाभावः"[23] इति। एवं रूपं मनसः सङ्कल्पं शुभं भवतु इति ऋषयः प्रार्थयते।

**मनसः नियन्त्रणम् –** मनस्तु सारथिवत्। सुसारथिः यथा रश्मि संयमनं कृत्वा अश्वान् निर्दिष्टमार्गेषु चालयति तथैव सारथिवत् मनस्तु अस्माकं शरीरस्य चालकः। अस्माकं शरीरं किं करिष्यति तत् निर्देशप्रदानं करोति अस्माकं मन एव –

"सुषारथिरश्वानिव यन्मनुष्या-
न्नेनीयतेऽभीशुभिवाजिन इव"[24] इति।

प्रसङ्गेऽस्मिन् महीधरभाष्येषु उक्तं - "मनः प्रेरिता एव प्राणिनः प्रवर्तन्ते। मनुष्यग्रहणं प्राणिमात्रोपलक्षणम्" [25] इति।

मनस्तु जरारहितं, तत् प्रकाशयति अगस्त्यः ऋषिणा 'अजिरम्' पदस्य माध्यमेन। शैशववस्थायां, कैशोरवस्थायां, यौवनवस्थायां, वार्धक्यवस्थायां शरीरस्य परिवर्तनं भवति। परन्तु मनसः किमपि परिवर्तनं न भवति - यतो जरारहितं हि मनः। प्रसङ्गेऽस्मिन् महीधरभाष्येषु उक्तं -" यच्च मनः अजिरं जरारहितं वाल्ययौवन स्थविरेषु मनसस्तदवस्थत्वात्"[26] इति।

[18] शिवसङ्कल्पसूक्तम्/३

[19] महीधरभाष्यम्

[20] महीधरभाष्यम्

[21] शिवसङ्कल्पसूक्तम्/४

[22] शिवसङ्कल्पसूक्तम्/५

[23] महीधरभाष्यम्

[24] शिवसङ्कल्पसूक्तम्/६

[25] महीधरभाष्यम्

[26] महीधरभाष्यम्

अत्र प्रश्नमागच्छति मनः कुत्र अवस्थितः? एतत् प्रश्नं निवारणाय ऋषिणा 'हृत्प्रतिष्ठं' शब्दस्य व्यवहारमपि कृतवान्। मनसः प्रतिष्ठा भवति हृदये। अस्मिन् प्रसङ्गे महीधरभाष्येषु उक्तं यत् - "यच्च मनः हृत्प्रतिष्ठं हृदप्रतिष्ठा स्थितिर्यस्य तत् हृद्येव मन उपलभ्यते"[27] इति। मनोलभ्यते हृदयेन एव। एवं मनसः सङ्कल्पं शुभं भवतु इति ऋषिणा प्रार्थयते।

**उद्भूत-प्रश्नाः –** आलोचनायाः परं कानिचन प्रश्नाः उद्घाटयन्ति। ते यथा –

(१) कः मनसि निर्देशप्रदानं करोति? कस्य निर्देशेन मनः कार्यं करोति?
(२) यतः मनः विषयस्य पुनः स्मरणं कारयति अतः मन्त्रस्य संरक्षणं कुत्र भवति? आत्मायां मनसि वा?
(३) सूक्तस्य अभ्यन्तरे ऋषिणा पुनः पुनः प्रार्थनां कृतवान् यत् मनसः सङ्कल्पं शुभं भवतु। अतः अत्र प्रश्नमागच्छति मनस्तु स्वयमेव अशुभं सङ्कल्पं ग्रहणं कर्तुं शक्नोति वा? स्वतः चिन्तनशीलः स्वतः कर्मशीलः वा मनः?
(४) पूर्वजन्मस्य संस्कारं स्वीकृत्वा मानवः जन्मलाभं करोति। परन्तु संस्कारं कुत्र तिष्ठति?
(५) शिवसङ्कल्पसूक्तमात्मायाः अस्तित्वं न स्वीकरोति वा?

**साधिताः शोधकार्याणि –** शुक्लयजुर्वेदमधिकृत्य वहुविधानि शोधकार्याणि विविधविश्वविद्यालये विविधैः शोधच्छात्रैः कृतानि। सागरविश्वविद्यालये 'पुनर्जन्मविमर्शः' इति विषये, कलिकाताविश्वविद्यालये जीवस्वरूपविषये, तथा वेनारसहिन्दुविश्वविद्दालये ड. सुधाकर मिश्रमहोदयः संस्कृतभाषायां वल्लभशंकरदृष्ट्या अद्वैतसिद्धिमण्डनम् इत्यस्मिन् विषये शोधच्छात्रैः विविध-विश्वविद्यालये कृतानि। तथापि मनस्तत्वः इत्यस्मिन् विषये अधुनापि कोऽपि शोधच्छात्रैः किमपि शोधकार्यं नैव कृतम्। तदर्थं विषयोऽयं मया गृहीतः।

**शिवसङ्कल्पसूक्ते मनः**

"यज्जाग्रतो दूरमुदैति दैवं
तदु सुप्तस्य तथैवेति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं
तन्मे मनः शिवसङ्कल्पमस्तु"[28]।।

अर्थात्, यः मनः जाग्रतः सुप्तः च पुरुषस्य चक्षुरादिनी इन्द्रियाणि त्यक्त्वा वहुदूरं गन्तुं शक्नोति, इन्द्रायाणां मध्ये अद्वितीयः प्रकाशरूपः इन्द्रियः तन्मसः सङ्कल्पं शुभं भवतु।

"येन कर्माण्यपसो मनीषिणो
यज्ञे कृण्वन्ति विदथेषु धीराः।
यदपूर्वं यक्षमन्तः प्रजानां
तन्मे मनः शिवसङ्कल्पमस्तु"[29]।।

अर्थात्, यस्य द्वारा कर्मनिष्ठः धीराः मनीषिणः यज्ञेषु यज्ञविधिविधानेषु कार्यं करोति, प्रजानां अन्तस्थितः सर्वप्रधानः पूज्यः तन्मसः सङ्कल्पं शुभं भवतु।

"यत्प्रज्ञानमुत चेतो धृतिश्च
यज्ज्योतिरन्तरमृतं प्रजासु।
यस्मान्न ऋते किं चन कर्म क्रियते
तन्मे मनः शिवसङ्कल्पमस्तु"[30]।।

अर्थात्, यः उत्कृष्टः (विशेषः) ज्ञानस्य जनकः तथा अपकृष्टः (सामान्यः) ज्ञानस्यापि जनकः, यः धैर्यस्य आधारस्वरूपः, प्राणिनां अन्तः विद्यमानं अमृतस्वरूपं प्रकाशस्वरूपञ्च, यस्मात् विना किमपि कर्मं न क्रियते मम तन्मनसः सङ्कल्पं शुभं भवतु इति।

"येनेदं भूतं भुवनं भविष्य-
त्परिगृहीतममृतेन सर्वम्।
येन यज्ञस्तायते सप्तहोता
तन्मे मनः शिवसङ्कल्पमस्तु"[31]।।

अर्थात्, येन अमृतेन मनसा भूतकालं वर्तमानकालं भवीष्यत्कालं च सर्वं परिगृहीतमस्ति, यस्य द्वारा सप्तहोता समन्विताः यज्ञः सम्पादितः भवन्ति, मम तन्मनसः सङ्कल्पं शुभं भवतु।

[27] महीधरभाष्यम्

[28] शिवसङ्कल्पसूक्तम्/१

[29] शिवसङ्कल्पसूक्तम्/२

[30] शिवसङ्कल्पसूक्तम्/३

[31] शिवसङ्कल्पसूक्तम्/४

"यस्मिन्नृचः सामयजूंषि यस्मि-
न्प्रतिष्ठिता रथनाभाविवाराः।
यस्मिंश्चित्तं सर्वमोतं प्रजानां
तन्मे मनः शिवसङ्कल्पमस्तु"[32]।।

अर्थात्, रथनाभौ अराः इव यन्मनसि ऋचः साम यजूंषि प्रतिष्ठिताः, प्रजानां सम्पूर्णं चित्तं यस्मिन् मनसि ओतं, मम तन्मनसः सङ्कल्पं शुभं भवतु।

"सुषारथिरश्वानिव यन्मनुष्या-
न्नेनीयतेऽभीशुभिवाजिन इव।
हृत्प्रतिष्ठं यदजिरं जविष्ठं
तन्मे मनः शिवसङ्कल्पमस्तु"[33]।।

अर्थात्, सुसारथि यथा रश्मि संयमनं कृत्वा अश्वान् नियन्त्रणं करोति तथैव यन्मनः मनुष्यान् नियन्त्रणं करोति, यः हृदये तिष्ठति, यः जरारहितः, यः अतीववेगशीलः, तन्मनसः सङ्कल्पं शुभं भवतु।

## वैशिष्ट्यानि

१. मनः जाग्रतः सुप्तश्च इन्द्रियादि अपेक्षया अधिकः गमणशीलः, मनः विज्ञानात्मकः, मनस्तु श्रेष्ठ-ज्योतिपदार्थः , मनसः उद्देश्यं शुभं भवतु।
२. मनीषिणः कर्मकुशलपुरुषः च मनसा कर्मविज्ञाने कर्मकुशलतायां वा सन्निवेशं करोति। मनः अपूर्वम्। प्रजानामन्तरे भवति मनसः अवस्थानम्। मनसः सङ्कल्पं शान्तं कल्याणकरं च भवतु।
३. मनः ज्ञानस्वरूपः, प्रसिद्धं भवति चित्तस्य धैर्यम्। मनः अन्तर्ज्योतिस्वरूपः। मनः अमृतस्वरूपः। मनसा विना किमपि कार्यं न भवति। मनसः सङ्कल्पं शुभं भवतु।
४. भूतकालं वर्तमानकालं भवीष्यत्कालं च सर्वमेव मनसा परिव्याप्तमस्ति। मनसा सप्तहोता समन्विताः यज्ञः विस्तृतं भवति।
५. वेदस्य अस्तित्वं मनसि स्मृतिरूपं भवति। शासकस्य शासितस्य च मनसः अन्वयसम्वन्धः।
६. मनः सारथिवत् मनुष्याणां नियन्त्रणं करोति। हृदये भवति मनसः प्रतिष्ठा। मनस्तु जरारहितः।

**उपसंहारः -** शुक्लयजुर्वेदस्य चतुस्त्रिंशत् अध्यायेषु उल्लिखितेषु शिवसङ्कल्पसूक्तेषु अगस्त्यः ऋषिणा मनसः सुनिपुणं विश्लेषणं कृतमस्ति। तस्य निर्देशानुसारेण मनः स्वतः क्रीयाशीलः। अपि च मन्त्रस्य ज्ञानस्य वा संरक्षणं संस्कारस्य अभ्यन्तरे एव भवति। अनन्तरं मनः तत् ज्ञानस्य प्रकाशकस्य भूमिकां पालयति। संस्कारस्य अभ्यन्तरे स्थितः ज्ञानं प्रकाशितं करोति मनः एव। विषयेऽस्मिन् वौद्धदर्शनेन सह किञ्चित् सादृश्यमपि अस्ति। वौद्धदर्शने नित्य आत्मायाः अस्तित्वं न स्वीकरोति। तत्र क्षणिकपरिवर्तनशीलः प्रवाहरूपं मनं आत्मारूपेन स्वीकृतम्। तत्र संस्कारं स्वीकरोति। तत् वत् अत्रैव आत्मायाः अस्तित्वं विषयेषु किमपि न उक्त्वा संस्कारं स्वीकृतम्। परन्तु एतदपि सत्यं यत् अत्रैव आत्मायाः नास्तित्वमपि न स्वीकृतम्।

[32] शिवसङ्कल्पसूक्तम्/५

[33] शिवसङ्कल्पसूक्तम्/६

## निर्वाचिताः ग्रन्थपञ्जी

(१) सेन, शुक्ला."द्वितीयार्ध."श्रौतपाठ, संस्कृतवुकडिपो, २००४, pp-१५९-१७०.
(२) पाठक, ड. यमुना, सिंह, ड. उमेश प्रसाद. "शिव-सङ्कल्प." नवीनवैदिकसञ्चयनम्, चतुर्थ., चौखाम्वा कृष्णदास अकादमी, २०१९, पृष्ठा-३४९-३५६
(३) मुत्सुद्दि, श्री वीरेन्द्रलाल. "चित्त." अभिधर्म्मार्थ-संग्रह, संशोधित पुनर्मुद्रण, महावोधि वुक एजेन्सी, २००८,
(४) कुमार, दीपक, भट्ट, संजय दत्त."वैदिक साहित्य का विशिष्ट अध्ययन. "संस्कृतप्रतिस्पर्धाप्रकाश, चौखाम्वा सुरभारती प्रकाशन, २०२१, पृष्ठा-३०-६९.
(५) श्यामल, किशोर. "महर्षि पतञ्जलि प्रणीत योग मनोविज्ञान." पातञ्जल योग मनोविज्ञान,प्रथम संस्करण, जानकी प्रकाशन, २०१६, पृष्ठा-७९-१०८.
(६) Williams, Monier, A Sanskrit English Dictionary, 2002., Motilal Banarsidass publishers Private Limited, 1899, pp-1069.

## संदर्भ

1. https://prinsli.com/shiv-sankalp-sukta-yajurveda-upanishad-man-ki-shakti-badhaye/
2. https://bhaktipath.wordpress.com/2020/11/01/%E0%A5%A5%E0%A4%B6%E0%A4%BF%E0%A4%B5%E0%A4%B8%E0%A4%82%E0%A4%95%E0%A4%B2%E0%A5%8D%E0%A4%AA-%E0%A4%B8%E0%A5%81%E0%A4%95%E0%A5%8D%E0%A4%A4%E0%A5%A5/
3. https://www.youtube.com/watch?v=U509CeTK1T4
4. https://www.youtube.com/watch?v=LiJZmBXZNmg&t=706s
5. https://www.youtube.com/watch?v=vZjgZ1uhCM8&t=208s
6. https://www.youtube.com/watch?v=hGNd01Y3tKA&t=52s

7. https://www.youtube.com/watch?v=x3U1sf-tpyA&t=53s
8. https://www.youtube.com/watch?v=hovUcE3Ei1Y&t=82s
9. https://www.youtube.com/watch?v=Bi78GlZi388&t=266s
10. https://www.youtube.com/watch?v=PeqyeXYQKlE&t=577s
11. https://hindi.speakingtree.in/spirituality/shiva-sankalp-sukta/articleshow/102470772.cms
12. https://thirdeye.chinmayamission.co.za/shiv-sankalp-sukta-hindi/
13. https://mr.wikipedia.org/wiki/%E0%A4%B6%E0%A4%BF%E0%A4%B5%E0%A4%B8%E0%A4%82%E0%A4%95%E0%A4%B2%E0%A5%8D%E0%A4%AA_%E0%A4%B8%E0%A5%82%E0%A4%95%E0%A5%8D%E0%A4%A4
14. https://ptvaishnavi.blogspot.com/2023/08/Shiv-sankalpa-sukta.html
15. https://www.exoticindiaart.com/book/details/commentary-on-shiva-sankalpa-sukta-nzx452/
16. https://www.divyarashmi.com/2021/11/blog-post_65.html
17. https://harshad30.wordpress.com/2017/03/05/%E0%A4%B6%E0%A5%8D%E0%A4%B0%E0%A5%80-%E0%A4%B6%E0%A4%BF%E0%A4%B5%E0%A4%B8%E0%A4%82%E0%A4%95%E0%A4%B2%E0%A5%8D%E0%A4%AA%E0%A4%B8%E0%A5%82%E0%A4%95%E0%A5%8D%E0%A4%A4/
18. https://mahadeo.foundation/a-garland-of-prayers/shiva-sankalpam-sukta/